# ।। संस्कृतसाहित्ये सस्यविज्ञानम् ।।

--हरिप्रसाद्,वि.टि. कटम्पूर्

### -उपक्रमम्-

भारतीयानाम् अस्माकं पौराणिकविज्ञानेषु केचन विषयाः आधुनिककाले सविशेषपरिगणनामर्हन्ति। एतत् कार्यं बहुभिः विद्वज्जनैरपि अङ्गीकृतम्। अत्यन्ताधुनिकशास्त्राणां गवेषणफलमिति प्रख्यापिताः बहवः शास्त्रप्रतिभासाः सूक्ष्मरूपेण अस्माकं पूर्विकानां चिन्ताधारासु अनायासेन द्रष्टुं शक्यन्ते। साहित्य-दर्शनादिविषयेषु इव इतरशास्त्रमेखलास्वपि ते पूर्वसूरिणः आत्मनः युक्तिप्रमाणैः निर्णयत्वं प्राप्तवन्तः। या भाषा साहित्य-दर्शनादिविषयेषु आत्मनः प्रागल्भ्यं अनितरसाधारणरीत्या प्रकटितवती सेयं संस्कृतभाषा शास्त्रसाङ्केतिकादिविषयाणां प्रकाशनेƒ पि स्वकीयमतितरां योगदानं दत्तवती इति कार्ये न कोƒ पि सन्देहलेशः। संस्कृत-शास्त्रयोः एतस्य सुदृढस्य बन्धस्य अङ्गीकारे केचन पण्डितम्मन्याः पराङ्मुखाः भवन्ति। अधुनातनकाले शास्त्रसाङ्केतिकानां विषयाणां पठनाय आङ्गलेयभाषा यावत्पर्यन्तं सहायकी भवति तावत्पर्यन्तमेव स्थानं पौराणिकशास्त्रपठने संस्कृतस्याप्यस्ति। सङ्गीतम्, वैद्यम्, गणितम्, ज्योतिषम्, वास्तुशास्त्रम्, कामशास्त्रम्, व्याकरणशास्त्रम् इत्यादयः शास्त्रविषयाः संस्कृतभाषासमुल्पन्ना इति बोधः केषाञ्चिदप्यस्ति। किन्तु खगोलविज्ञानम्, रसविज्ञानम्, भूगर्भविज्ञानम्, परिस्थितिविज्ञानम्, भौतिकशास्त्रम्, सस्यशास्त्रम्,

ध्वनिशास्त्रम् इत्यादिषु विविधेषु शास्त्रविषयेषु अपि संस्कृतभाषा बहूनि योगदानानि कृतवती इत्येतत् तथ्यं सर्वेषामपि अधुनातनानाम् अज्ञातमस्ति। तथापि अस्माकं पूर्विकानां समस्तमपि दर्शनं सत्यमिति, तदेव तथ्यमिति चात्र अस्माभिर्न विवक्षितम्। पूर्वोक्तेषु सर्वेष्वपि विषयेषु पौराणिकाः यावच्छक्यं परीक्षणनिरीक्षणादिभिः ज्ञातान् विषयान् स्वस्यैव चिन्तानिकषोपलैः घर्षयित्वा तेषां मूल्यं प्रदर्शितवन्तः। एष एव सिद्धान्त इति कथ्यते।

*परीक्षकैः बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा निश्चितोर्थः सिद्धान्तः -*

इति प्रसिद्धो ƒ स्ति। तथापि तेषां सिद्धान्तेषु च ज्ञानस्य अभ्यासस्य च परिमित्या कदाचन प्रमादो ƒ पि भवेदेव। पौराणिकैः अनेकप्रकारेण विमर्शितस्य लब्धस्य च सिद्धान्तस्य कूलङ्कषया रीत्या आमूलाग्रविमर्शनं कृत्वा यत् त्याज्यं भवति तेषां त्यजनं, यद् ग्राह्यं भवति तेषां ग्रहणञ्च आधुनिकैः विद्वज्जनैः करणीयं भवति। अस्मिन् विषये कालिदासमहाकवेः वचनमेव प्रमाणम् -

*पुराणमित्येव न साधु सर्वं*
*न चापि काव्यम् (शास्त्रं) नवमित्यवध्यम्।*
*सन्तः परीक्ष्यान्यतरत् भजन्ते*
*मूढः परप्रत्ययनेयबुद्धिः ।।*

इत्यनेन वचनेन पुराणं सर्वं साधु इति वक्तुं न शक्यते। तत्सर्वं साधु वा असाधु वा इति परीक्षणमेव आधुनिकैः करणीयम्।

क्रिस्तोः पूर्वं बहूनां शतकानां पौराणिकत्वं भवति अस्माकं वैदिकसाहित्यस्य। तेषु एव सर्वासां भारतीयचिन्ताधाराणां

मूलरूपाणि द्रष्टुं शक्यन्ते। संहिता, आरण्यकम्, ब्राह्मणम्, उपनिषद् इत्यादिषु बृहत्सु वैदिकसाहित्येषु कांश्चन विषयानधिकृत्य समग्रपठनं द्रष्टुं न शक्यन्ते। यतः सर्वेपि विषयाः संहितादिषु इतस्ततः विकीर्णाः दृश्यन्ते। तथापि तेषां क्रोडीकरणेन यस्य कस्यापि विषयस्य समग्रदर्शनं लब्धुं शक्यन्ते। वेदेषु अक्रोडीकृताः विषयाः एव पुनः क्रोडीकृत्वा ग्रथिता एव उपवेद इति कथ्यते।

*आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः,स्थापत्यवेदः*

इति चत्वार उपवेदाः तत्तद्विषयाणां शास्त्रीयचर्चया सम्पन्नाः भवन्ति। तेषु लब्धप्रतिष्ठः अतिप्रसिद्धः शाखोपशाखाभिर्वद्धितो ƒ यं भवति आयुर्वेदः।

*आयुष्याणि अनायुष्याणि च द्रव्यगुणकर्माणि यः वेदयति सोयमायुर्वेदः* इति निर्वचनं प्रसिद्धमस्ति। आयुर्वेदः न केवलं मनुष्याणामारोग्यसंरक्षणे प्रवृत्तः, अपि तु तरुपक्षिमृगादीनामपि आरोग्यविषये व्यवहृतो भवति। एषु प्रसिद्धाः भवन्ति *चरक-सुश्रुताष्टाङ्गहृदयादयः*। एतद् सर्वविदितं खलु। तथा मुनेः पालकाप्यस्य *हस्त्यायुर्वेदः* गजचिकित्साविषये, शाङ्गंधर-सुरपालयोः *वृक्षायुर्वेद*ग्रन्थौ वृक्षपरिचरणविषये च प्रसिद्धौ भवतः। *महाभारतस्य* सभापर्वणि *मत्स्यपुराणे* च अश्वचिकित्साम् अधिकृत्य सविस्तरं प्रतिपादयति। एतासु सर्वासु शास्त्रकृतिषु शास्त्रार्थप्रतिपादनाय संस्कृतभाषा एव उपयुक्ता इति तस्याः भाषायाः शास्त्रप्रतिपादनसामर्थ्यं व्यनक्ति। अहमत्र एतस्मिन् विषये संस्कृतस्य शास्त्रस्य च मिथो बन्धस्य दृढीकरणाय स्पष्टीकरणाय च सस्यशास्त्रम् एव विशेषोदाहरणत्वेन प्रतिपादयामि।

## -सस्यविज्ञानम् संस्कृतसाहित्ये-

मानवो यावद्कालादारभ्य प्रकृत्या सह मिलित्वा जीवितं नेतुं निश्चिकाय तदारभ्य आत्मनः जीवनोपाधये समस्तमपि सस्यजालं उपयुक्तवान्। भोजनाय,पर्णकुटीनिर्माणाय, देहाच्छादनाय, रोगशमनार्थञ्च मानवो वृक्षं समाश्रितवान्। अतः वृक्षाणां संरक्षणपोषणादयश्च तस्य कर्तव्याः अभवन्। त एव पौराणिकसस्यशास्त्रस्य समुद्भवे मार्गदर्शकाश्च अभवन्। न केवलं संस्कृतसाहित्ये अपि तु विश्वसाहित्य एव अतिप्राचीनमिति विदिते ऋग्वेदे, तैतिरीयसंहितायाम्, शतपथब्राह्मणे च सस्यानाम् औषधगुणमधिकृत्य परामृष्टान् भागान् यत्रकुत्रचित् द्रष्टुं शक्यते। *नास्ति सस्यमनौषधम्* इति पुरातनचिन्ता भारतीयदर्शनेषु प्रमुखमेकं स्थानमावहति। गोधूम-मुल्ग-तिलादीनां तथा सस्यरोगाणाञ्च आनुषङ्गिककविवरणम् ऋग्वेदे दृश्यते। तैतिरीयसंहितायां सस्यानां साङ्गोपाङ्गविवरणं एवं करोति आचार्यः।

*ओषधीभ्यः स्वाहा, मूलेभ्यः स्वाहा, तूलेभ्यः स्वाहाः, काण्डेभ्यः स्वाहा, वल्केभ्यः स्वाहाः, पुष्पेभ्यः स्वाहा, फलेभ्यः स्वाहाः, वनस्पतीभ्यः स्वाहा, स्कन्धेभ्यः स्वाहा, शाखाभ्यः स्वाहा, पर्णेभ्य स्वाहा (7-3-19,20)* इत्यतस्मिन् मन्त्रभागे वृक्षस्य अङ्गानामामूलाग्रपरिचयं तनोति आचार्यः। *शतपथब्राह्मणे* च पर्णम्, पुष्पम्, कोशी, मूलमित्यादीनामङ्गानां परामृष्टो अस्ति। एवं बृहदारण्योपनिषदि तु वृक्ष-मनुष्ययोः परस्परतुलनं करोति आचार्यः।

तत् यथा-

*यथा वृक्षो वनस्पतिः तथैव पुरुषो मृषा ।*
*तस्य लोमानि पर्णानि त्वगस्योल्पाटिका बहिः ।।*
*त्वच एवास्य रुधिरं प्रस्यन्ति त्वच उत्पटः।*
*मांसान्यस्य शकराणि कीनारं स्नाव तत् स्थिरम् ।।*
*अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता।*
*यद् वृक्षो वृक्णो रोहति मूलान्नावतरः पुनः।।*
*मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात् प्ररोहति ।।(3-9-28)* इति।।

अत्र मानवस्य लोम-त्वक्-मांस-रुधिरास्थि-मज्जादीनाम् इव वृक्षाणामपि पर्णादयः सन्ति इति सादृश्यकल्पना मानवस्य इव वृक्षस्यापि प्राणाः सन्ति इति दर्शनस्य प्राग्रूपो ƒ स्ति। चिन्ताकुबेरो ऋषिवर्यः सादृश्यमिदम् आर्षरीत्या अत्र स्पष्टीकरोत्येव खलु।

सस्यानामपि मानवस्य इव वृद्धिः,चलनं, निद्रा, जाग्रता, व्याधिः, गुणसंक्रमणस्वभावः इत्यादयोपि सन्ति इति विषये भारतीयदार्शनिकाः वर्षेभ्यः पूर्वमेव स्वेषामभिमतानि प्रकाशितवन्तः आसन्। धर्मोत्तराचार्यस्य *धर्मबिन्दूटीकायां* सस्यानां पर्णानि नक्तं सङ्कोचं प्राप्नुवन्ति इति विवृणोति। गुणरत्नः *षड्दर्शनसमुच्चय*व्याख्यायां सस्यानां जीवनविशेषतामधिकृत्य परामृशति। उदयनाचार्यस्य *किरणावल्यां* पृथ्वीनिरूपणावसरे *वृक्षादयः प्रतिनियतभोक्त्रधिष्ठिताः जीवन-मरण-स्वप्न-जागरण-रोग-भेषजप्रयोग-सजातीयानुविध्य-अनुकूलोपगम प्रतिकूलापगमादिभ्यः प्रसिद्धशरीरिण इव सन्ति* इति निरूपयति।

जीवनम्, मरणम्, निद्रा, प्रबोधः, व्याधिः, भेषजप्रयोगम्, अनुकूलसाहचर्यं प्रति आभिमुख्यम्, प्रतिकूलात् वैमुख्यम् इत्यादयः अन्यशरीरिणाम् इव वृक्षाणामपि सन्ति इत्यनेन दर्शनेन वृक्षा अपि प्राणयुक्त इति आचार्येण निरीक्षितम्। महाभारते मोक्षधर्मपर्वणि शताधिकचतुरशीतितमे अध्याये भृगु-भरद्वाजसंवादे वृक्षस्यापि गन्धरसस्पर्शादीनां संवेदनसामर्थ्यमस्ति इति सविस्तरं प्रतिपादयति।केरलव्यासस्य महाकवेः कुञ्जिक्कुट्टन् तम्बुरान् महाभागस्य व्यासभारतविवर्तनात् अत्र परामृष्टो अंशः उद्धरामि।

ഭരദ്വാജൻ പറഞ്ഞു ഃ-

പഞ്ചഭൂതങ്ങളോടൊത്തതാണെന്നാലീച്ചരാചരം
അചരങ്ങടെ ദേഹത്തിൽ കാണ്മീലീയഞ്ചുധാതുവും
ചൂടും ചേഷ്ടയുമില്ലാതെ ഘനത്വം പൂ ിരിക്കവേ
വൃക്ഷങ്ങളുടെ ദേഹത്തിലൊക്കുന്നീലഞ്ചുധാതുവും
കേൾപ്പീല കാണ്മീല ഗന്ധരസങ്ങളറിവീലവ
സ്പർശം ബോധിപ്പീല പഞ്ചഭൗതികത്വമിതെങ്ങിനെ?
ദ്രവ്യത്വമില്ലഗ്നിയില്ല ഭൂമിയില്ലില്ല വായുവും
അനന്താകാശമില്ലൊക്കാ ഭൗതികത്വം മരങ്ങളിൽ (6-9)

ഭൃഗു പറഞ്ഞു ഃ-

ഘനങ്ങളാകും വൃക്ഷങ്ങൾക്കു ാകാശമസംശയം
അവയ്ക്കെന്നാൽ പുഷ്പഫലവ്യക്തികാണുന്നു നിത്യവും
ചൂടാൽ വാടുന്നു ് തൊലി,യില,പൂ കായുമങ്ങിനെ
വാടുന്നൂ കൊഴിയുന്നൂയെന്നതിൽ സ്പർശവുമു ിഹ
കാറ്റുതീയിടിനാദങ്ങൾമൂലം പൂകായ് കൊഴിഞ്ഞിടും
ചെവികൊ ാണ്ടൊച്ചകേൾപ്പതെന്നാൽ കേൾപ്പൂ മരങ്ങളും
വള്ളിചുറ്റുന്നു വൃക്ഷത്തിൽ ചുറ്റുമെത്തുന്നിതങ്ങനെ
കണ്ണില്ലാത്തോനില്ലമാർഗ്ഗ,മെന്നാൽ കാണ്മൂ മരങ്ങളും
പുണ്യാപുണ്യങ്ങൾ ഗന്ധങ്ങൾ പലധൂമമിവറ്റിനാൽ
രോഗമെന്ന്യേ പൂക്കുമെന്നാൽ നാറ്റുന്നു ീ മരങ്ങളും

പാദത്താൽ ജലപാനത്താൽ വ്യാധികാണുകയാലുമേ
വ്യാധിക്കുമറുകൈയാലുമു ്വൃക്ഷത്തിൽ നാവുമേ
വളഞ്ഞത ാർത്ത ാലേ വെള്ളം കേറ്റുന്നവണ്ണമേ
വായുവൊക്കും മരം പാദംകൊ ്വെള്ളം കുടിക്കായാം
സുഖദുഃഖം കൊള്ളുകയാൽ മുറിച്ചാലും പൊടിക്കയാൽ
വൃക്ഷങ്ങളിൽ ജീവനുമു, ില്ലാ ചൈതന്യഹീനത
അതെടുക്കുന്നൊരാവെള്ളം തീയും കാറ്റും ജരിക്കുമേ
ആഹാരപരിണാമത്താൽ സ്നേഹം വൃദ്ധിയുമൊത്തിടും

(മഹാഭാരതം ശാന്തിപർവം, അധ്യായം–184, ശ്ലോകം 10–18 വിവർത്തനം–കൊടുങ്ങല്ലൂർ കുഞ്ഞിക്കുട്ടൻതമ്പുരാൻ)

पञ्चभूतसिद्धान्तः त्रिदोषसिद्धान्तश्च आयुर्वेदीयमौलिकसिद्धान्तौ स्तः। तथा वृक्षायुर्वेदे ढ पि पञ्चभूतसिद्धान्तस्य त्रिदोषसिद्धान्तस्य च परामर्शो द्रष्टुं शक्यन्ते। पूर्वोक्तमहाभारतसंवादे वृक्षेषु पञ्चभूतानां स्वाधीनमधिकृत्य कृता चिन्ता सुव्यक्ता एव। एवं वात-पित्त-कफादीनां वैषम्येन वृक्षस्यापि रोगोत्पत्तिः भवति इति त्रिदोषसिद्धान्तेन वृक्षायुर्वेदे ढ पि व्यनक्ति। सुरपालस्य *वृक्षायुर्वेदे* वृक्षाणां रोगमधिकृत्य एवं वदति-

*शरीरागन्तुभेदेन द्विप्रकारः समासतः।*
*सर्वभूरुहजातीनां आतङ्कः परिकीर्तितः।।*
*तत्र वातात् कफात् पित्ताच्छारीराणां समुद्भवः।*
*आगन्तूनां समुत्पत्तिः कीटशीतादिभिर्भवेद्।।* इति।।

समेषामपि वृक्षाणां व्याधिः आगन्तुकम्, शारीरिकम् इति द्विप्रकारेण भवति। तत्र वातपित्तकफादीनां वैषम्यमेव मनुष्याणामिव वृक्षाणामपि शारीरिकामये व्याधिहेतुः। आगन्तुकानां सांक्रमणिकानां व्याधीनां समुत्पत्तिः कीटात् शैत्यातपाद्यवस्थाविशेषादपि भवति।

तत्र च रूक्षकषायादिद्रव्यैः सेचनं करोति चेत् भूम्याः संशोषणम्, तस्मात् वातकोपेन वृभाणामामयोऽपि संजातो भवति। कृशता, कुब्जता, ग्रन्थि, गुटिका, रूढपत्रता, अल्परसत्वम्, अस्वादुफलत्वम्, च एतेन वातामयेन सम्भवन्ति। स्वादु-स्निग्धाम्लशीतादिगुणसंयुक्तानां द्रव्यानां सेचनेन कफजो रोगः, कट्वम्ललवणयुक्तैः तीक्ष्णजलैः सेचनेन पित्तजाः आमयाः जायन्ते। अतिकालफलत्वम्, पाण्टुत्वम्, कुब्जपत्रता, अवृद्धिः, फलानां रसशून्यत्वम् इत्येते कफजरोगेण भवन्ति। पीतपत्रता, आकालफलस्रावः, विशोषणम्, पत्रपुष्पफलादीनां म्लानत्वम्,तेषां च्युतिश्च गीष्मकाले वर्षावसाने च पित्तजेनामयेन सम्भवन्ति। अमितजलसेचनेन,जलसेचनाभावेन,मृद्दोषेण, कुठारादीनाम् अभिघातेन च वृक्षाणां रोगाः जायन्ते।कफदोषेण वृक्षाद् मनुष्याणां रक्तस्राव इव परिस्रावो भवति। आध्यान्मिकम्, आधिभौतिकम्, आधिदैविकम् इति तापत्रयाः वृक्षाणामपि सन्ति।वातपित्तादीनां दूषणेन आध्यात्मिकम्, कृमिकीटशीतादिभिः आधिभौतिकम्, प्रचण्डपवनाशनिपातैः आधिदैविकञ्च तापाः भवन्ति। बीजदोषेण ,परिचरण दोषोण,सततमनातपदेशाश्रयणेन च वृक्षाणाम् अमयो जायते। एवं वृक्षस्यामयमधिकृत्य तेषां परिहारञ्चाधिकृत्य अस्माकं पूर्विकैः विद्वद्भिः कूलङ्कषयारीत्या चिन्तितमासीत्। क्रिस्तोः पूर्वं तृतीयशतके रचितमिति निर्णीते कौटिल्यस्य अर्थशास्त्रे वृक्षचिकित्सायाः प्राग्रूपः द्रष्टुं शक्यन्ते। वराहमिहिरस्य वृहत्संहितायां पञ्चपञ्चाशत्तमे अध्याये वृक्षायुर्वेदस्य समग्रविवरणं लभ्यते। बृहत्संहितायाः प्रसिद्धव्याख्याता भट्टोल्पलः वृक्षायुर्वेदस्य व्याख्यानावसरे काश्यपस्य वृक्षायुर्वेदग्रन्थस्य स्मरणं करोति।

तस्माद्परं शार्ङधरः, तदनु सुरपालश्च वृक्षायुर्वेदनामको ग्रन्थौविरचितवन्तौ। विष्णुधर्मोत्तरपुराणे द्वितीयखण्डे त्रिंशतितमाध्यायः वृक्षायुर्वेद इति प्रसिद्धोस्ति। अग्निपुराणे द्विशताधिकद्व्यशीतितमे अध्यायेपि वृक्षायुर्वेदवर्णनं द्रष्टुं शक्यन्ते। एतेषु वृक्षायुर्वेदग्रन्थेषु सुरपालस्य ग्रन्थो विशेषस्थानम् आवहति। तस्मिन्तु तरुमहिमा, वृक्षाणां शुभाशुभलक्षणम्, भूमिनिरूपणम्, बीजोत्पत्तिविधिः,वपनविधिः, कुणपजलम्, पोषणम्, रोगज्ञानम्, चिकित्सा, विचित्रम्, भूमिपरीक्षा, अन्नादिननिष्पत्तिः इति विभिन्नेषु विषयेषु विभक्तं त्रयोदशाध्यायः सन्ति। *(सुरपालस्य ग्रन्थोयम् आङ्गलेय़भाषाव्याख्यया सह अधुना उपलब्धोस्ति। वृक्षायुर्वेदः इन् आन्ष्यन्ट् इन्त्या-वित्त् ओरिजिनल् टेक्स्ट् आन्ट् ट्रान्सिलेषन् । सन्दीप् प्रकाशन्,न्यूदल्लि)* अत्र परामृष्टेषु अध्यायेषु विचित्रम् इति प्रसिद्धोध्यायः अधुनापि विशेषपठनार्हो भवति। विचित्रमिति नाम्ना सुरपालेन स्वकीये वृक्षायुर्वेदग्रन्थे विशेषरीत्या, अन्यै सामान्यरीत्या च वर्णितोयं भागः विभिन्नेष्वपि सस्येषु वैचित्र्यं कर्तुम् नैक उपायो वर्णयति। बड्डिङ् इति पश्चात्काले प्रसिद्धस्य वृक्षारोपणविधिम् अधिकृत्य बृहत्संहितायाम् आचार्यो वदत्येवम्-

*पनसाशोक-कदली-जम्बू-लकुच-दाडिमाः*
*द्राक्षापल्लीवताश्चैव बीजपूरातिमुक्तकाः।*
*एते द्रुमाः काण्डारोपो गोमयेन प्रलेपिताः।*
*मूलच्छेद्यथवा स्कन्धे रोपणीया प्रयत्नतः।।* (बृहत्संहिता 55-1) इति वचनेन पनसादीनां वृक्षाणां काण्डं छित्वा गोमयेन प्रलेपनं कृत्वा वृक्षस्यापरस्य मूले अथवा स्कन्धे तं विशेषेण संस्थाप्य तस्मात् प्रयत्नेन पनसादय आरोपणीयाः इति सुस्पष्टं

व्यनक्ति आचार्यः। एवं त्रपूसीलतायाः *(उर्वारुकम्-वेल्लरि इति कैरल्याम्)* प्रकाण्डः कूश्माण्डस्य प्रकाण्डेन साकं मधुसर्पिषा लिप्त्वा पलालरज्वा बध्वा गोमयेन पुनःप्रलेपनं कृत्वा, यदा तौ प्रकाण्डौ मिथो मिलित्वा एकीभावं प्राप्नोति तदा मूलाग्रयोः छेदनं कृत्वा विवर्धयति चेत् तस्यां कूश्माण्डलतायां बृहदाकारं त्रपुसीफलं जायते इति सुरपालः विवृणोति। अत्र एतदपि चिन्तनीयं भवति अस्माभिः। विशेषगुणयुक्तस्य आम्रवृक्षस्य सहकारः इति नामान्तरं प्रसिद्धमस्ति संस्कृतभाषायाम्।

*अपुष्पफलवानाम्रः पुष्पितश्चूत उच्यते।*
*पुष्पैः फलैश्च संयुक्तः सहकारस्स उच्यते।।* इति *अमरकोशस्य पारमेश्वरीव्याख्याने* तद्भेदं कथयति व्याख्याता। सह करोति इति सहकारः इति पदव्युत्पत्तया तत्रापि काण्डेन सह काण्डस्य मेलनं भवति वा न वा इति अस्माभिश्चिन्तनीयम्। सहकारस्य कैरल्याम् *ओट्टुमाव्* इति प्रसिद्धं भाषान्तरञ्चास्ति।

सुरपालस्य वृक्षायुर्वेदग्रन्थे विचित्रो नाम दशमे अध्याये अनेकानि सस्यकौतुकानि वर्ण्यन्ते।तत् यथा-

*सदा पुष्पफलापत्तिरकालफलपुष्पता।*
*तथा गन्धसमुल्पत्तिरनस्थित्वं रसान्यता।।*
*वर्णप्रवर्त्तनं पुष्पपरिवृत्तिः फलान्यता।*
*गन्धप्रवर्त्तनं गन्दबन्धनं वल्लिपुष्पता।।*
*लतात्वं वामनत्वं च मिश्रता चिरपाकता।*
*अपाकः फलदीर्घत्वं नाशः सम्प्रति जन्म च।।*
*तत्कालफलता पुष्पफलताजन्मपीनता चेति विचित्रम् ।।*
*(सुरपालस्य वृक्षायुर्वेदः 10-1..4)*

एवं वृक्षाणां प्रकृतौ कृत्रिमरीत्या वैचित्र्यं कर्तुं शक्यते इति आचार्य निस्सन्देहमभिप्रैति।वृक्षेषु सदा पुष्पफलापत्तिः अकालफलपुष्पता, विचित्रगन्धसमुल्पत्तिः, एकस्मिन् फले अन्यस्य रसत्वम्, वर्णवैचित्र्यम्, अन्यफलोल्पादनम्, दीर्घवृक्षाणां वामनत्वम्, वृक्षस्य लतारूपेण तथा लतायाः वृक्षरूपेण च परिवर्त्तनम्, फलानां चिरकालपाकता, फलानां दीर्घत्वम्, तत्कालफललाभ इत्यादीनां विभिन्नानामद्भुतानां परामर्शः तस्मिन्नध्याये द्रष्टुं शक्यते। प्रयत्नसुलभानाम् अस्मद् पूर्विकानां परीक्षणनिरीक्षणादिभिः सञ्चितमिदं ज्ञानं समस्तमपि तथ्यमिति वक्तुं नाहं समर्थः। किन्तु तत्सर्वं सत्यं वा न वा इति विषये यदा निर्णयपथं प्राप्नोति तस्मात्पूर्वं अधुनातनैः प्रयत्नशालिभिः पूर्वधारणां विना परीक्षणं कर्तव्यम्। अनन्तरमेव सत्यं वा न वा इति सिद्धान्तो करणीयः इति एकवारमपि प्रार्थयामि। अनेन नूतनपरीक्षणेन संस्कृतस्य शास्त्रपक्षपातित्वे तथा शास्त्रस्य संस्कृताश्रयणे च नवीनमभिमतं कर्तुं शक्यते चेत् तदेव आशावहम् इति शम्।।

***सहायकग्रन्थाः***


*1.बृहत्संहिता -भट्टोल्पलव्याख्यासमेतः ।*

*2.वृक्षायुर्वेदः -सुरपालः।*

*3.शाङ्र्गधरपद्धतिः ।*

*4.बृहदारण्यकोपनिषद् ।*

*5.अमरकोशम् पारमेश्वरी।*

*6.चरकसंहिता (भाषाचरकसमेता)।*

*7.महाभारतम् (भाषाभारतम्)।*

*8.आयुर्वेददर्शनम् -राघवन्तिरुमुल्पाट्।*

9.വൃക്ഷായുർവേദഗ്രന്ഥങ്ങൾ ഒരു പഠനം- എൻ.വി.പി. ഉണിത്തിരി
10.Science in Samskrit -Samskrita Bharati
11.Ancient Indian Science and its Relevance to the Modern World -RS Vidyapeetha,Tirupati

.

.......हरिप्रसाद् ,वि.टि.कटम्पूर् ।
कण्णुर्-670 663
Phone 9446431656/0497-2831656
haripradadvt1973@gmail.com
kalidasavidyapeedam@gmail.com